# नायक्स टयुटोरिअल्स


Way to Excellence

**Year: 2024-2025** — **नमुना प्रश्नपत्रिका -१** — **पूर्णाङ्क्ष : ४०**

**वर्ग : १० वी (SSC)** — **संस्कृत - ५०** — **समय : २ होरा:**

प्रश्न . (१) अ) चित्रं दृष्ट्वा नामानि लिखत। (४तः३) प्रथमः विभागः - सुगमसंस्कृतम् (६)




आ) सङ्ख्याः अक्षरैः /अङ्कैः लिखत। (३तः२) २ २

१) नवविंशतिः २) ४७ ३) दश

इ) समय लिखत। १

| अ | आ |
|---|---|
| १) विंशत्यधिक -दशवादनम् | ५.५० |
| २) पादोन -अष्टवानम् | १० .२० |
| | ७.४५ |

द्वितीयः विभागः – गद्यम् १४

प्र.२) अ) गद्यांश पठित्वा कृती कुरूत।

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः। सः ग्रामः पूर्णानदीतीरे वर्तते। तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म खिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान्। पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत च। माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म। परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता

१) अवबोधनम्। (३तः२) २

अ) उचितं कारणं चित्वा वाक्यं पुनर्लिखित।

शङ्करस्य मातैव पुत्रस्य पालनम् अकरोत् यतः ...............।

१) शङ्कराय केवलं माता अरोचत।

२) बाल्ये एव तस्य पिता शिवगुरूः दिवङ्गतः।

आ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत।

शङ्करस्य ऐहिकविषयेषु अरूचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता।

इ) एषः गद्यांशः कस्मात् पाठात् उदधृतः ?

शब्दज्ञानम् (३तः२) २

१) गदयांशात् २ पूर्वकालवाचक - धातुसाधित - ल्यबन्त - अव्यये।

२) गद्यांशात् विशेषण -विशेष्ययोः मेलनं कुरूत।

| 'अ' | 'आ' |
|---|---|
| शङ्करः | चिन्तामग्ना |
| आर्याम्बा | दिवङ्गतः |

| | |
|---|---|
| | विरक्तः |

३) पूर्वपदं/उत्तरपदं लिखत।

१) चास्ताम् = ................. +आस्ताम्।

प्र.२) आ) गद्यांश पठित्वा कृती कुरूत।

अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः । क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः । मृगशृगालौ दृष्ट्वा काकोऽवदत्, ''सखे चित्राङ्ग! कोऽयं द्वितीयः ?'' मृगः **अब्रूत,** ''जम्बूकोऽयम् । अस्मत्सख्यम् इच्छति ।'' काकः उपादिशत्, ''अकस्मादागन्तुना सह मित्रता न युक्ता।'' तदाकर्ण्य जम्बूकः सकोपम् **आह,** ''मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानपि।'' मृगः **अब्रवीत्,** ''अलं विवादेन । वयं सर्वे आनन्देन एकत्र निवसामः ।'' काकेनोक्तम्, ''एवमस्तु।''

१) अवबोधनम्। (३तः२) २

अ) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

शृगालः मृगेण सह सख्यम् इच्छति यतः ..............।

१) शृगालः मृगमांसं खादितुम् इच्छति।


२) शृगालः मृगे स्निहयति।

आ) कः कं वदति ? जम्बूकोऽयम्

इ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।

मृगशृगालौ दृष्ट्वा <u>काकः</u> अवदत्।

२)गद्यांशं पठित्वा जालरेखाचित्रं पूरयत । २




प्र.२) इ) गद्यांश पठित्वा सरलार्थं लिखत।(२तः१) ४

१) शक्रः – (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे ।

कर्णः – दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।

शक्रः – (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत् । यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम् ।

२) वैखानसः – (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः – प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः – राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते।

प्र.२) ई) माध्यमभाषया उत्तरं लिखत। (२तः१) २

१) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?

२) दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते ?

तृतीयः विभागः पद्यम्

प्र.३) अ) पद्यांश पठित्वा कृती कुरूत। (५तः४) १०

१) मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ।।


२) यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरूषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा ॥
अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि ।
धनं जनेभ्यः किल याचतेऽयम्
न याचको वा न च निर्धनो वा ॥

१) पूर्ण वाक्येन उत्तरत। कनकपरीक्षा कथं भवति?

२) विशेषण - विशेष्ययोः मेलनं कुरूत।

| अ | आ |
|---|---|
| बहुश्रुताः<br>प्राचीनाः | वृत्तपत्रम्<br>मनुजाः<br>कविपण्डिताः |

३) जालरेखाचित्रं पूरयत।




४) पद्यांशात् २ प्रथमा -विभक्तन्तपदे लिखत।

५) पूर्वपदं/उत्तरपदं कुरूत।
(१) तथापि = ...........+ अपि
(२) याचतेऽयम् = ...........+ अयम्।

प्र.३) आ) श्लोकौ शुद्धौ पूर्णौ च लिखत। (३तः२) ४
१) वैद्यराज .................. धनानि च ॥
२) आत्मनो ................ सर्वार्थसाधनम् ॥
३) उत्तमो .................. प्रजायते ॥

प्र.३)इ) माध्यमभाषाया सरलार्थ लिखत।(२तः१) २
१) वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ॥

२) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ॥१॥

## चतुर्थः विभागः भाषाभ्यासः

(१०)

प्र.४.अ) पृथक्करणम् कुरूत।

१) मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरूत।(५तः४) २

| नाम | सर्वनाम |
|---|---|
| | |

(राजा,अहम्,इमाः, कर्षकः,रमायाः)।

२) मञ्जूषातः क्रियापदानि धातुसाधित -विशेषणानि च पृथक्कुरूत। (५तः३) २

| क्रियापदम् | धातुसाधित विशेषणम् |
|---|---|
| | |

(मन्यते,सेवमानः,गमनीयः,धावति,कथयितव्यः)

प्रश्न.४.आ) निर्दिष्टाःकृती कुरूत। (४तः२) ४

१) सङ्ख्या /क्रम/आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (३तः२) २

क) ................. महिलाः जलम् आहर्तुं गच्छन्ति। (तिस्त्र/त्रीणि)

ख) पौषमासः संवत्सरस्य...... मासः।(दशः/दशमः)

ग) तेन ................. प्रयोगः कृतः (तिस्त्रः / त्रिवारं)

२)समासविग्रहाणां समासनामभिः सह मेलनं कुरूत। (६तः४) २

| समासविग्रहः | समासनाम |
|---|---|
| (१) वाचनस्य प्रशंसा | समाहार-द्वन्द्वः। |
| (२) हस्तौ च पादौ च एतेषां समाहारः | षष्ठी-तत्पुरुषः। |
| (३) चोरलुण्ठकेभ्यः भयम् | नञ्-तत्पुरुषः। |
| (४) न आदरः | चतुर्थी-तत्पुरुषः। |
| (५) प्रजाहिते दक्षः | पञ्चमी-तत्पुरुषः। |
| (६) पूजायै इदम् पूजार्थम् | सप्तमी-तत्पुरुषः। |

३) मञ्जूषातः समानार्थकशब्दान् /विरूद्धार्थकशब्दान् चित्वा लिखत। (४तः२) २

१) कनकम् = ..............। २) स्तुतिः × .................।

३) धनम् = .................। ४) बद्धः × .................।

(मञ्जूषा - निन्दा, वित्तम्, सुवर्णम् , मुक्तः)

४) योग्य पर्यायं चिनुत। (३तः२) २

१) पृथुभूपेन धनुः सज्जीकृतम्। (कर्तृवाच्यम् /कर्मवाच्यम्)

२) भवान् नक्रात् ...........। (त्रायस्व /त्रायताम्)

३) प्रजाः अतीव ........... आसीत्। (कृशः / कृशाः)

प्र.४.इ) विशिष्ट - विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरूत। (४तः२) २

१) गम् - गच्छ् (१प.प.) २) नमः ३) कृते ४) कथ् (१० उ.प)

****______****